* H D Z - 0 0 1 - 0 1 4 1 0 5 *

# HDZ-001-014105 Seat No. ________

## M. A. (Sem. I) (CBCS) Examination

**November / December – 2017**

## Sanskrit : Paper-01

***(Vedantashastra)***

*(१) वेदान्तपरिभाषायाः प्रत्यक्षपरिच्छेदः*

*(२) पञ्चदश्याः प्रथमं प्रकरणम्*

**Faculty Code : 001**
**Subject Code : 014105**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

**१** નીચેનામાંથી કોઈપણ **બે** ગદ્યખંડોનો અનુવાદ કરો : **૧૪**

**1** Translate any **two** of the following : **14**

(१) ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति । उच्यते । चैतन्यस्यादित्वेऽपि तदभिव्यञ्जकान्तः करणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते । ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः । तदुक्तं विवरणे – 'अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्' इति ॥

(२) ननु कामादेरन्तःकरणधर्मत्वेऽहमिच्छाम्यहं जानाम्यहं बिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते । उच्यते । अयः पिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयो दहतीति व्यवहारस्तथा सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासात् अहं सुखी दुःखीत्यादिव्यवहारः ॥

(३) न चैवमपि वर्तमानदशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम् । इष्टत्वात् । 'दशमस्त्वमसि' इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात् । अत एव पर्वतो वह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षम् । पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरण् वृत्त्यवच्छिन्नचैतन्याभेदात् ।

(४) तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षि ईश्वरसाक्षि चेति । तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम् । तत्साक्षि तु अन्तःकरणोपहितं चैतन्यम् । अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः । विशेषणं च कार्यान्वयि व्यावर्तकम् । उपाधिश्च कार्य्यानन्वयी व्यावर्तको वर्तमानश्च ।

| | | |
|---|---|---|
| ૨ | નીચેનામાંથી કોઈપણ **બે**નો અનુવાદ કરો : | ૧૪ |
| 2 | Translate any **two** of the following : | 14 |

(૧) मासाब्दयुगकल्पेषु गतागामिष्वनेकधा ।
नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥

(२) इत्थं सच्चित्परानन्द आत्मा युक्त्या तथाविधम् ।
परं ब्रह्म तयोश्चैक्यं श्रुत्यन्तेषूपदिश्यते ॥

(३) त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीम् ।
अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते ॥

(४) मायाविद्ये विहायैवमुपाधी परजीवयोः ।
अखण्डं सच्चिदानन्दं परं ब्रह्मैव लक्ष्यते ॥

| | | |
|---|---|---|
| ૩ | વેદાન્તની ઉત્પત્તિ અને વિકાસ પર નોંધ લખો. | ૧૪ |
| 3 | Write a note on origin and development of Vedanta. | 14 |

**અથવા / OR**

| | | |
|---|---|---|
| ૩ | કેવલાદ્વૈત સમજાવો. | ૧૪ |
| 3 | Explain 'Adwaita Vedanta'. | 14 |

| | | |
|---|---|---|
| ૪ | પૂર્વાપર સંદર્ભ આપીને સમજાવો : (કોઈપણ **બે**) | ૧૪ |
| 4 | Explain with reference any **two** of the following : | 14 |

(૧) तत्र प्रमाकरणं प्रमाणम् ।

(२) तच्च प्रत्यक्षं द्विविधम् । सविकल्पकनिर्विकल्पकभेदात् ।

(३) अभाने न परं प्रेम भाने न विषये स्पृहा ।

(४) प्रकृतिर्द्विविधा च सा ।

| | | |
|---|---|---|
| ૫ | નીચેનામાંથી કોઈપણ **બે** પર ટૂંકનોંધ લખો : | ૧૪ |
| 5 | Write short notes on any **two** of the following : | 14 |

(૧) द्वैतवादः ।

(२) द्वैताद्वैतवादः ।

(३) पञ्चकोशाः ।

(४) वेदान्तपरिभाषोक्तप्रमाणानि ।